M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 32

Title: Kalaka Vada

32

Incomplete

:	Kāraka Vāda	:	Title
:	: Jayarama.	:	Author
:	:	:	Editor
:	: Saka. 1717	:	Year, Vols.
:	:	:	Publisher
32 :	: व्याकरण.	:	Remarks

M.E.

श्रीगणेशायनमः नत्वाशंभोःपदांभोजं जयरामः समासतः करोतिकारकव्याख्यामिह संख्यावतांमुदे १ तत्रकारकाणि कर्तृकर्म
करणसंप्रदानापादानाधिकरणानिषट् तत्संचतत्र नक्रियानिमित्तत्वं चैत्रस्यतंडुलंपचतीत्यादौसंबंधिनिचैत्रादौ अतिव्याप्तेःअ
नुमत्यादिप्रकाशनद्वारासंप्रदानादेरिव तंडुलादिसंपादनद्वारासंबंधिनोपि पाकादिक्रियानिमित्तत्वात् किंतु क्रियान्वितविभक्त्य
र्थान्वयित्वंतत् अस्तिच कर्तृकर्मादेः क्रियान्वितत्तिङ्सुब्विभक्त्यर्थान्वयः नतुतादृशेसंबंधिनिषष्ठ्यर्थः संबंधस्यतंडुलादिनामा
र्थान्वितत्वेपि क्रियानन्वितत्वं चैत्रस्यपचतीत्यादावपि तंडुलादिपदाध्याहारेणैवबोधः षष्ठ्यर्थसंबंधस्यनामार्थेनैवक्रियायाः
कर्मत्वादिनैवसाकांक्षतयापरस्पराकांक्षाविरहात् ओदनस्यपाकः मैत्रस्यपाकइत्यादौ कर्मत्वकर्तृत्वार्थिकाषष्ठीकारकविभ
क्तिरेव कर्तृकर्मणोः कृतीतिसूत्रेणतद्विधानात् अतएव संबंधस्यसंबंधिनः कारकव्यवहारोनास्ति क्रियान्वितविभक्त्यर्थान्वित
त्वाभावादिति अतएव गुरुविप्रतपस्विदुर्गतानांप्रतिकुर्वीतभिषक् न कारकत्वंक्रियायोगाभावादितिशाब्दिकाः पक्वस्यैषधसेवित्यादौ
मालक्ष्मीरूपकुरुते यथापरेभ्यानित्यादौ च रोगोविपक्तेः बेधादिनामाध्याहारेणैवबोधः यदिचविनाध्याहारं तत्रक्रियायांषष्ठ्यर्थसंब
धान्वयः प्रामाणिकः तदाक्रियान्वितकर्तृत्वकर्मत्वादिषट्कान्यतमान्वयित्वकारकत्वंबोध्यं अतएवचर्मणिद्वीपिनंहंतीत्यादौनिमि
त्तादेरपिनकारकत्वं इत्येतादृशपदविभक्त्यर्थः नतुकारकविभक्त्यर्थः गांपयोदोग्धि अजांग्रामंनयतीत्यादौ गौणमुख्यकर्मद्वयमपिल
क्ष्यं अत्रहिदुहधातोर्विभागानुकूलक्रियानुकूलव्यापारविशेषः कर्तृनिष्ठोदुहेरर्थः यादृशंसंपर्कंदोग्धीतिवारणायइवद्रव्यति
मैत्रोमगनंजलंदोग्धीतिवारणायविशेषपदं इति विशेषोदुहधातुप्रयोगगम्यः इत्थंचइदंद्रव्यहरतिनेदं इत्यपिवदंति संयोगानुकूलक्रिया
नुकूलव्यापारस्तादृशोनीधातोः तत्राद्येविभागगामिहस्त्याक्रियायांपयसःस्वस्वान्वयात् गांदोग्धिविभागानुकूलपयोदोग्धिक्रियानुकू
लव्यापारानुकूलयत्नवान् इतिवाक्यार्थः द्वितीयेग्रामनिष्ठस्यसंयोगेअजानिष्ठस्यक्रियायामन्वयात् ग्रामंसंयोगानुकूल
अजांनिक्रियानुकूलव्यापारानुकूलकृतिमान् इतिवाक्यार्थः साक्षाद्धात्वर्थतावच्छेदकनिरूपकक्रियारूपफलान्वितान्वयित्वेअजा
पयसोर्मुख्यकर्मत्वं तादृशक्रियारूपफलावच्छेदकविभागसंयोगरूपफलद्वयान्वितान्वयित्वेनगोग्रामयोर्गौणकर्मत्वं उभयत्रे

त्वधात्वर्थान्वितविशेष्यत्वं धात्वर्थान्वितत्वमस्ति फलद्वयस्यापि धात्वर्थत्वात् अतएव कर्मद्वयसाकांक्षफलबोधकधातुत्वं द्विकर्मकत्वमुप
पदं वस्तुविभागानुकूलक्रिया दुहः संयोगानुकूलक्रिया नयतेरर्थः नतु तदुभयानुकूलकर्तृव्यापारः कर्मद्वयस्यापि विभागे
संयोगे चान्वयप्रसक्तौ तत्र पयोऽजयोः कर्मत्वानुपपत्तेः परसमवेतत्वस्य क्रियाया अभावात् कर्मद्वयस्यापि एकत्र फलेऽन्वये चागो
पानुरवं व्यवहारो न स्यात् एतेन विभागाद्यनुकूला कर्तृगता चेष्टैव दुहाद्यर्थः इत्यपास्तं फलद्वयाजवेशे गौणानुरूपव्यवहारा
नापत्तेः क्रियानुकूलव्यापारः कर्तृनिष्ठो धात्वर्थ इति मतेन यदपीति मतं बोध्यं यदपि गां दुग्धस्यापीगो दुग्धं पयस्येवान्वेतीति गौ
णकर्मत्वं न स्यादिति तदपि न गौः पयो दुह्यते इत्यादौ गोः कर्मत्वस्य दुरुपपादत्वात् अजां ग्राममित्यादौ ग्रामवृत्तित्वस्य प्राक् अ
ज्ञायामत्वेनान्वयायोगात् काशीतः प्रयागे नीयमानो ऽजः काशीं त्यजतीति प्रयोगापत्तेश्च तत्र तत्क्रियानुकूलकृतिमत्त्व
तत्क्रियाकर्तृत्वं काष्ठादेः पाकाद्यनुकूलव्यापारवत्त्वप्रसिद्धानेपि कर्तृपदप्रयोगात् कृताकृतविभागादिना सिद्धयत्नविशेषकिं न
कृधातुनात् जन्ते न सिद्धस्य कर्तृशब्दस्य यत्नाश्रयबोधकत्वाच्च अचेतने कर्तृपदस्य प्रयोगस्तु गौणः इष्टिकुरुत
इत्यादौ नास्तादिक्रियाविषयकयत्नसत्त्वेपि तत्क्रियाया अनिष्पत्तौ तत्क्रियाकर्तृत्वव्यवहाराद्विषयत्वं विवक्षि
तम् अनुकूलत्वं तु फलं यदि च मन्तव्यं तत् नतु मया कृतमिति व्यपदेशात् नो तरीयककृतिसाध्यस्य पिण्डाप्रमस्य शाकेनादि
भोजनस्य न कर्तृत्वं तदविषयत्वमपि निवेश्य तत्तत्साध्यत्वेन तेन यागादिकृतेः उद्देश्यत्वेन स्वर्गादिविषयकत्वेपि न या
गादिकर्तुः स्वर्गादिकर्तृत्वं अस्मदादिकर्तृकपरकादिकर्तृत्वं ईश्वरेष्टं तथाविवक्षायां ईशः पचतीति प्रयोगापत्ती
इत्यत्र नो चेत् कार्यतावच्छिन्नजन्यतानिरूपितं असाधारणं अनुकूलत्वं निवेश्यमिति नैयायिकाः वैयाकरणास्तु
अनभिहिते कर्तरीत्यादौ अचेतनेपि कर्तृपदप्रयोगात् क्रियाश्रयत्वमेव कर्तृत्वं कारककर्मादिपद इव कृधातुरपि

अत्र क्रियार्थक एव आश्रयत्वमिह तत्तदाख्यातार्थद्वारा तथाच यगाद्यसमभिव्याहृताख्यातेन यद्धात्वर्थान्वितायद्धर्मवत्त्वं बोध्यते तद्धात्वर्थनि
रूपित तद्धर्मवत्त्वं तद्धात्वर्थकर्तृत्वं यथा पचतीत्यादौ पाकाद्यनुकूलव्यापारवत्त्वं जानातीत्यादौ ज्ञानाद्याश्रयत्वं नश्यतीत्यादौ नाशप्रतियोगि
त्वं चैत्रेण पच्यते तण्डुल इत्यादौ पाकजन्यफलाश्रयत्ववारणाय यगाद्यसमभिव्याहृतेति अत्र चैत्रादेः कर्तृत्वं तु पचतीत्याख्यातबोध्यधर्ममादा
येवेति बोध्यं धात्वर्थान्वितद्वितीयाद्यर्थकर्मत्वकरणत्वादिवारणाय आख्यातेनेति जानातीत्याद्याख्यातार्थाश्रयत्वं न पाककर्तृत्वं इतीयत्र
मिह साश्रयत्वं न गमनकर्तृत्वं इत्येतत्संपत्तये यद्धात्विति धात्वर्थविशेषणं यदि च काष्ठं पचतीति स्थाली पचतीत्यादिप्रयोगात् करणादीनां कर्तृत्व
मिष्टं पच्यते ओदनः स्वयमेवेत्यादौ कर्मकर्तरि कर्मणोऽपि ओदनः स्वपचतीत्यप्रयोगस्तु असाधुत्वात् चैत्रो मैत्रं ग्रामं गमयतीत्यादावपि मैत्रादेः
कर्तृत्वमिष्टमेव अन्नगमनानुकूलव्यापारो णिजर्थः तदनुकूलव्यापारश्चाख्यातस्य तत्र णिजन्तार्थव्यापारस्यापि गच्छतीत्याद्याख्यातार्थ
त्वात् अनुकूलकृतिमत्त्वस्यापि अत्र सत्त्वाच्चेति किमाख्यातपदेनेति विभाव्यते तदा कर्मत्वकरणत्वविशिष्टस्य कर्तृत्वरूपतावारणाय तत
दुपादेयं नहि कर्मत्वादेः कर्तृत्वरूपत्वे अनभिहितकर्तरि तृतीयेत्याद्यनुशासनार्थः संगच्छते इत्याहुः यत्तु स्वतन्त्रः कर्तेति पाणि
नीयसूत्रात् कारकान्तराप्रयोज्यत्वे सति कारकान्तरप्रयोजकत्वं कर्तृत्वं कारणकलापप्रयोक्तृत्वं कर्तृत्वं यत्तेन पुरुषादिजन्यसं
योगादिव्यापारवत्स्वरूपतत्प्रयोज्यत्ववतः कुठारादेर्व्युदास इति तन्न ईश्वराप्रयोज्यानां जीवानां कर्तृत्वानापत्तेः दण्डादिजन्यसं
योगादिरूपव्यापारवति कुलालादौ अतिव्याप्तेश्चेति दिक् अथ किं कर्मत्वं न करणव्यापार्यत्वं तद्धि करणजन्यव्या
पारवत्त्वं दात्रेण धान्यं लुनातीत्यादौ हस्तादिकरणव्यापार्ये दात्रादौ अतिव्याप्तेः नापि परसमवेतक्रियाजन्यफलशा
लित्वं गामिप्सोः कर्मत्वस्य प्रवेशमिन्द्रदेश संयोगस्तु तत्र स्थितस्यन्दे पूर्वापरयोः प्रसंगात् नदीं वहतीत्यादौ वृक्षः अवयवोप
चयरूपायाः परम्परया फलस्य तीरप्राप्तिरूपस्याश्रयतीत्वे कर्मत्वापत्तेश्चेति चेत् अत्र वदन्ति धात्वर्थतावच्छेदकफलशा
लित्वं कर्मत्वं तादृशं च फलं गमेः संयोगः त्यजेर्विभागः पतेरधःसंयोगः तत्तदवच्छिन्नस्पन्दत्वं शक्तेः स्पन्दमात्रे तेषा

शक्तेपर्यायतापत्तेः स्पंदेर्वधधातोश्च न फलावच्छिन्नव्यापारे शक्तिरिति न कोपि दोषः फलावच्छिन्नव्यापारबोध
का कत्वादेव धातूनां सकर्मकत्वव्यवहारानुरव्यः जानातीत्यादिना तु नामार्थान्वितद्वितीयार्थातिरिक्तविषयित्वरूपविभक्त्य
२ र्थान्वयार्थकत्वे गौणं सकर्मकत्वं घटं जानातीत्यादितो घटविषयिताशालिज्ञानाश्रयवानिति बोधात् तादृशधातुयो
गत्वकर्मप्रत्ययः अतएव च अभुंजानेपि भोजनाय यतत इति प्रयोगात् यद्वा त्वर्थनामार्थान्वितस्य चतुर्थ्यर्थो द्वितीय
त्वस्यैवान्वयान्नियतेः सकर्मकत्वं न वा भोजनमयतत इति प्रयोगः अत्र भूमिं त्यजति विहगो विजहाति महीरुहं ननु स्वान्यान
भितिप्रयोगात् स्वस्य धात्वर्थतावच्छेदकसंयोगविभागरूपफलशालित्वेपि कर्मत्वाभावात् परसमवेतक्रियाजन्यत्वमपि धात्वर्थतावच्छे
दकफले निवेश्य नचैवमपि मल्लो मल्लं गच्छतीत्यादौ उभयकर्मजसंयोगरूपफलस्य तादृशत्वात् स्वकर्तृकक्रियाकर्मत्वव्यवहारः स्वाभि
न्स्यात् परसमवेतं यत् क्रियाजन्यं तादृशफलशालित्वं यत्र तत्र क्रियाकर्मत्वस्य स्वीकारात् इत्थं च द्वितीयादेः क्रियान्वयिपरसमवेतत्वम
प्यर्थः परत्वं स्वप्रकृत्यर्थापेक्षया सुपां स्वार्थफलान्वय्यपेक्षया कर्माख्यातेन बोध्यते तथा च भूमिं प्रयातीत्यादिना भूमिभिन्नसमवेत
भूमिवृत्तिसंयोगजनकस्पन्दानुकूलकृतिमान् इति बोधः = भूमिर्गम्यत इति कर्माख्यातस्थले फले परसमवेतत्वं च आख्यातार्थः भूमि
पदार्थस्य च परत्वविशेषणत्वेन फलप्रतिविशेष्यत्वेनान्वयः तथा च भूमिभिन्नसमवेतक्रियाजन्यफलशालिनी भूमिः इत्यन्वयबोधः २
एवं च स्वभिन्नसमवेतं स्ववृत्तिसंयोगजनकं यत् मल्लान्तरवृत्तिगमनं तदनुकूलकृतिमत्त्वस्य स्वस्मिन् अभावात् न मल्लः स्वं गच्छतीत्या
दिप्रयोगः नन्वत्र परत्वे प्रकृत्यर्थस्य अन्वयितावच्छेदकावच्छिन्नप्रतियोगितया प्रतियोगितामात्रेण वान्वयः नाद्यः पृथिवीं प्रया
तिरवगा इत्यादौ अनन्वयापत्तेः स्वगास्य पृथिवीत्वावच्छिन्नभिन्नत्वाभावात् न द्वितीयः स्वात्मन्यपि स्वघटोभयभेदसत्त्वात् स्वप्र
यातीत्याद्यापत्तेरिति चेन्न द्वितीयार्थफले यद्व्यक्तेरन्वयस्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन प्रकृत्यर्थस्य कर्माख्याता
र्थफलान्वयिनश्च परत्वेऽन्वयात् इत्थं च पृथिवीं प्रयातीत्यादौ यत्पृथिवीव्यक्तिवृत्तिसंयोगजनकत्वं प्रयाणस्य तद्व्यक्तिभि

न्नत्वं विहगेत्यादौ दोषः परे तु पृथिवीं पृथिवीं प्रयातीत्यादौ यत्र पृथिवीव्यक्तित्वावच्छिन्नपदं कर्मीभूत तत्र तत्पृथिवीव्यक्तिपरं एवमन्यत्र
कर्मवाचकसामान्यपदं लक्षणया विशेषपरं इत्थं च अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वमुसन्ने नभिंगदुलाद्धं यत्तु
परसमवेतत्वं नार्थः किंतु अन्योन्याभावप्रतियोगितावच्छेदकत्वं क्रियान्वयिद्वितीयार्थः तथा च भूमिवृत्तिसंयोगजनकभूमि
निष्ठान्योन्याभावप्रतियोगितावच्छेदकप्रयाणानुकूलकृतिमान् इत्यर्थः स्ववृत्तिक्रियायाः स्वनिष्ठान्योन्याभावप्रतियोगितावच्छे
छेदकत्वात् न स्वं प्रयातीत्यापत्तिः इति तन्न एवमपि येन मल्लेन मल्लान्तरं न गतं सोपि मल्लो मल्लं गच्छतीति प्रयोगापत्तेः मल्लान्तरनि
ष्ठभेदप्रतियोगितावच्छेदिकायास्तन्मल्लक्रियायास्तन्मल्लभूमिवृत्तिसंयोगजनकत्वात् यन्मल्लव्यक्तेः फलान्वयस्तस्या एव अन्यो
न्याभावेऽन्वयो व्यक्तेः तद्व्यक्तित्वादेः प्रकारत्वे शक्यतावच्छेदकत्वं च कथंचित्संसर्गत्वे तु उक्तपरसमवेतत्वमेव सम्यक् कर्मवाचकपदस्य तद्व्य
क्तित्वावच्छिन्ने लक्षणास्वीकारे युगपद्वृत्तिद्वयविरोधप्रसंगः ननु नान्योन्याभावप्रतियोगितावच्छेदकत्वं क्रियान्वयिद्वितीयार्थः
न वा परसमवेतत्वं कर्मवाचकपदार्थतावच्छेदकावच्छिन्नान्वितद्वितीयार्थसमवेतत्वरूपसामान्यधर्मावच्छिन्नतत्तत्कर्मसमवेत
त्वनिष्ठप्रतियोगिताकाभावात्मकस्वप्रतियोगिकाभावसंबंधेन कर्मवाचकपदार्थान्वितद्वितीयार्थसमवेतत्वस्य धात्वर्थक्रिया
यामन्वयस्वीकारात् सामान्यरूपेण विशेषाभावानभ्युपगमेपि यद्व्यक्तेर्द्वितीयार्थसमवेतत्वस्य धात्वर्थक्रियायां अन्वय
स्वीकारादेव न विहगः स्वं गच्छतीति प्रयोगः इच्छासंबंधेनान्वयबोधस्य क्वाप्यदृष्टचरत्वेपि प्रकृते तेन गत्यन्तरविरहात् स्वीका
रात् अतएव कर्मवाचकपदस्य तत्तद्व्यक्तित्वेन तत्तद्व्यक्तिबोधकता सामान्यरूपेण बोधकतया च न युगपद्वृत्तिद्वयवि
रोध इति चेन्न नव्यनये क्रियाया अपि अव्याप्यवृत्तितया तन्निष्ठतदाश्रयद्रव्यसमवेतत्वस्यापि अव्याप्यवृत्तित्वात्
मल्लः स्वं गच्छतीति प्रयोगप्रसंगस्य दुर्वारत्वापत्तेः एतेन तत्क्रियानधिकरणत्वे सति तत्क्रियावच्छेदकफलशालित्वं कर्मत्वं
द्वितीयादेरपि तत्क्रियानधिकरणत्वं अर्थ इत्यपास्तं अनंतशक्त्यापत्तेश्च यत्तु क्रियान्वयिपरसमवेतत्वमपदस्य कर्मान्वयि

परत्वमेव लाघवात्कर्मप्रत्ययार्थ इति तन्न द्वितीयार्थफलपरसमवेतत्वयोरेकान्वयित्वेन लाघवात् ग्रामो गमेः कर्म न तु चैत्रोऽप्यादौ
कार. परसमवेतत्वं क्रियाजन्यत्वघटितस्यैव कर्मपदार्थतया तस्यैव कर्मप्रत्ययार्थत्वात् गम्यते ग्रामः स्वयमेवेत्यादौ परत्वान्वयिविरहा
३ दित्यादिक् अथैवमपि पतेः अधःसंयोगावच्छिन्नस्पन्दार्थकतया धात्वर्थतावच्छेदकफलशालिनो भूतलादेः कर्मत्वे वृक्षात्पर्णं
भूमितलं पततीति प्रयोगः स्यादिति चेन्न तथाविवक्षाया अभावस्यैव अत एव द्वितीयाश्रितातीतपतितेत्यादिसूत्रे पतितशब्दयोगे द्विती
यासमासविधानं तदुदाहरणं च नरकं पतितो नरकपतित इति साधु संगच्छते क्वचित्तथाप्यपि साधुः यथा भूमौ पततीति ग्रामं
गच्छतीतिवत् परं तु भूतलादेः कर्मत्वेऽपि न द्वितीया यत्र फलस्य संबन्धाकाङ्क्षा तत्रैव तत्स्वीकारात् अत्र तु फलस्याधःसंयोगितया पर्णस्थि
तेर्न संबन्धाकाङ्क्षा यद्वा कर्तृभिन्नान्वयिफलावच्छिन्नव्यापारबोधकस्यैव धातोः सकर्मकत्वं स्वीकार्यं ग्रामं गम्यादेः न तु पतेः अधः
संयोगरूपफलस्य पर्णान्वितत्वात् अध इत्यस्य संबन्धिसाकाङ्क्षतया संबन्धितया पर्णस्यान्वयात् भूतलस्य पर्णस्याधो न तु भूतल
स्येति न भूतलं पततीति प्रयोगः अथ कथं वृक्षात्पर्णं अधः पततीति प्रयोग इति चेत् विभागात् अधो विवक्षया वा गतं तिरश्ची
नमनूरुसारथेः प्रसिद्धमूर्ध्वज्वलनं हविर्भुजः पतत्यधो धाम विसारि सर्वतः किमेतदित्याकुलमीक्षितं जनैः इत्यत्र तु नारदस्य
अधोधाम पततीत्यर्थान्वये दोषदूरापास्तः यत्तु त्यजिगम्यादेः स्पन्दमात्रव्यापारमात्रार्थकः फलस्य तु द्वितीयादिलभ्यत्वात् अ
त एव ग्रामं गच्छति ग्रामं त्यजतीत्यनयोर्नैकार्थता त्यजिगम्यादौ योगे द्वितीयादिना विभागसंयोगयोर्बोधनात् स्पन्दे तु विभागाव
च्छिन्नस्पन्दशाब्दत्वस्य गमेः संयोगावच्छिन्नस्पन्दशाब्दत्वस्य चैतत्पक्षेऽदकत्वात् अत एव गमनं त्याग इत्यनयोरपि नैकार्थता उ
क्तकार्यकारणभावानुरोधेनात्रापि त्यजिगम्यादौ विभागसंयोगावच्छिन्नस्पन्दे लक्षणास्वीकारात् विभागाद्यवच्छिन्नस्पन्द
शाब्दत्वं च विभागादिस्पन्दोभयविशिष्टपदगाणि शाब्दत्वं तेन चैत्रेण ग्रामस्त्यज्यते इत्यादिजन्यस्पन्दविशेषणकविभागादि
विशेष्यकशाब्दबोधसंग्रहः इत्थं च परसमवेततत्क्रियार्थान्वयिफलविशेषशालित्वं तत्क्रियार्थकर्मत्वं तेन गृह्यादेर्नातर

देशादौ कर्मत्वमिति तन्न विभागाद्यवच्छिन्नस्पन्दशाब्दत्वअन्यतावच्छेदकत्वे लाघवात् शस्पन्दे शक्तेर्दुर्वारत्वात् परेषामितरान्वितशक्ति
ग्रहे इतरं यद्विभागाद्यंशस्य लाभस्तु तदुक्तः त्यागगमनयोरेकार्थतावारणाय तत्र सफलविशिष्टस्पन्दे शक्तिसिद्धिर्विनापि
लक्षणाप्रतिसंधानं तथा प्रतीतिरिति दिक् एवं ददातेर्मूल्यग्रहणं विना स्वस्वत्वध्वंसपरस्वत्वजनकस्त्यागो यजतेर्देवतोद्देश्य
कस्वत्वध्वंसफलकस्त्यागः जुहोतेस्त्यागविशेषोऽग्निप्रक्षेपः अत एव त्वृत्विजां तादृशत्यागाभावेऽपि होतृत्वं अग्निप्रक्षेपश्च अग्नि
संयोगानुकूलक्रियानुकूलो घृतादिहस्तनोदनादिव्यापारः न चैवं अग्नौ जुहोतीत्यादौ सप्तम्यर्थस्य अग्निसंयोगस्यान्वये
निराकाङ्क्षतेति वाच्यं अग्निसंयोगानुकूलक्रियानुकूलव्यापारस्यैव धात्वर्थत्वात् न च तथाप्यग्नेः कर्मतापत्तिः संयोगस्य धा
त्वर्थतावच्छेदकतावच्छेदकतया तद्वतोऽग्नेः कर्मत्वाभावात् क्रियाया एव धात्वर्थतावच्छेदकतया तद्वतो घृतस्यैव कर्मत्वात् इत्थं
च विप्राय गां ददाति विष्णुं यजते घृतं जुहोतीत्यादौ मूल्यग्रहणं विना विप्रोद्देश्यकगोनिष्ठस्वस्वत्वध्वंसपरस्वत्वजनक
त्यागानुकूलकृतिमान् विष्णूद्देश्यकस्वस्वत्वध्वंसफलकत्यागानुकूलकृतिमान् घृतवृत्त्यग्निसंयोगावच्छिन्नक्रियानु
कूलव्यापारानुकूलकृतिमानित्यन्वयबोधः विष्णोरुद्देश्यतासंबन्धेन स्वस्वत्वध्वंसरूपफलवत्त्वात् कर्मत्वं एवं मूल्यग्रहणप्रयुक्तस्व
स्वत्वध्वंसपरस्वत्वजनकस्त्यागो विक्रयः मूल्यदानप्रयुक्तस्वस्वत्वलोभादकस्वीकारः क्रयः दातृस्वत्वस्य स्वत्वजनकस्वीकारः प्रतिग्रहः
तथा च तथा च गां विक्रीणाति क्रीणाति प्रतिगृह्णातीत्यादौ गोवृत्तिमूल्यग्रहणप्रयुक्तस्वस्वत्वध्वंसपरस्वत्वानुकूलत्यागानुकूल
कृतिमान् गोवृत्तिमूल्यदानप्रयुक्तस्वस्वत्वानुकूलस्वीकारानुकूलकृतिमान् गोवृत्तिदातृस्वत्वध्वंसस्वस्वत्वजनकस्वीकारानुकू
लकृतिमान् इति क्रमेणान्वयधीरिति संप्रदायः इदमत्र बोध्यं दानस्य परस्वत्वजनकत्वे तत एव विक्रयादिवारणे मूल्यग्रहणं वि
नेति व्यर्थं अथ प्रतिग्रह एव स्वीकारविशेषः स्वत्वहेतुः अस्वामिके स्वीकारस्य स्वत्वहेतुत्वकल्पनात् अत एव याजनाध्ययन
प्रतिग्रहैर्ब्राह्मणो धनमर्जयेदित्यादिकं साधु संगच्छते अन्यथा प्रतिग्रहवैफल्यापत्तेः दानं तु स्वस्वत्वध्वंसमात्रसंजनकतया प
रस्वत्वप्रयोजकं इति मतं तथापि पूर्वोक्तं लक्षणमसम्यक् तदुपादानेऽप्युपेक्षायामतिव्याप्तेः तस्या अपि स्वस्वत्वध्वं

सद्वाराग्ररस्वत्वप्रयोजकत्वात् तद्वारत्वायैवेज्जालोपादानस्यावश्यकत्वात् वस्तुतः द्रव्यं पात्रमुद्दिश्य स्वकद्रव्यस्य प्रतिग्रहात्प्रा
का॰ क् अस्वामिकस्यानुद्दिश्यैनपुरुषेण प्रतिग्रहादिवत्त्वस्यात् अन्योद्देशकत्यागादेः प्रतिबंधकत्वे तु गौरवं नचतादृशत्यागे दाना
४ भासएव सत्संप्रदानकोहि त्यागो दानं संप्रदानत्वंच द्रव्यानुमितिप्रदर्शनद्वारा दानक्रियोद्देश्यत्वं नच असन्निहितस्यत
त्वमिति नततोदातुः स्वत्वनाशइतिवाच्यं तीर्थस्य संकल्पितद्रव्यं यदन्यत्रप्रदीयते दातातीर्थफलं भुंक्ते प्रतिग्राहीनदोष
भाक् मनसापात्रमुद्दिश्य भूमौतोयं विनिक्षिपेत् विद्यते सागरस्यांतो दानस्यांतो न विद्यते इत्यादिवाक्यानां दर्शनादा
नसिद्धेः तस्माद्दानमेव स्वत्वजनकं प्रतिग्रहप्रागभावस्यापि दाणीयत्वान्न प्रतिग्रहवैफल्यं अतएवयस्मैदत्तं तेन अप्रतिग्रहेन दातुःस्वत्वनि
वृत्तिः अलुब्धादेतद्द्रव्यस्वीकारत्वरूप प्रतिग्रहत्वेन स्वीकर्तव्यद्रव्य नवनवीतिविनिगमकाभावाद्दानं स्वत्वध्वंस द्वारा प्रतिग्रहस्य साक्षा
त्स्वत्वजनकं उभयथापि मूल्यग्रहणं विनेतिव्यर्थं नच विक्रीतद्रव्यस्वीकारत्वं क्रयत्वमित्यत्रापि विनिगमनाविरहः मूल्यदानपूर्व
कस्वीकारत्वस्यैव क्रयत्वात् विक्रयत्वस्यगोरवेणानिवेशात् किंच स्वस्वत्वध्वंसजनकेत्यपि व्यर्थं अव्यावर्तकत्वात् अपिच
अग्निप्रक्षेपोहोमइत्यप्ययुक्तं देवतोद्देश्यकः स्वत्वध्वंसफलकत्यागोयागः सएवप्रक्षेपावच्छिन्नोहोमइति वाचस्पति
मिश्राद्युक्तेः यागएवविशिष्टदेशप्रक्षेपोपहितोहोमइतिविवेकोक्तश्च अपिच स्वत्वित्यागात् यजमानस्वस्वत्वध्वंसे अनुम
तदासौ दित्यागाद्देशस्वस्वामित्वध्वंसवत् वस्तुतोदानत्वयागत्वहोमत्वादयोमानसप्रत्यक्षगम्या जातिविशेषाः नचश्राद्धस्य
पित्रेपक्षयायागत्वब्राह्मणापेक्षया दानत्वमितिविवेकोक्तेस्तयोः सांकर्यान्नजातित्वमितिवाच्यं श्राद्धस्यगौणतद्वयरूपत्वा
त् वस्तुतः श्राद्धस्य यागत्वमेव उद्देश्यपित्रादिस्वत्वाजनकत्वात् ब्राह्मणस्यस्वत्वमपिन सार्वत्रिकं ब्राह्मणाभावेपिश्राद्धो
क्तेः पिंडांस्तुगोजविप्रेभ्य इत्यादिना अन्यत्रापि तत्प्रतिपत्तेः विष्णुयजत इत्यादौ द्वितीयार्थोप्युद्देश्यत्वं तत्वंच तस्यैव इत्यारोपत्वा
नविषयत्वं देवतायाः स्वत्वापगमेतु यागहेदानत्वमाप्य होमत्वं यागत्वमाप्य इतितु सर्वसिद्धं देवपूजादिकमपियागएवसत्वे

अप्रक्तेन अतएव संस्पृष्टत्वे असाधारणस्वत्वनाशोत्तरं साधारणस्वत्वोत्पादात् तत्र सकलविशेषणसहितमूललक्षणातिव्याप्ति
रिसपास्तं दानत्वजातेस्तत्राभावात् परमात्रस्वत्वानुकूलत्वविशेषणात्वस्याप्तिनिरास इत्यन्ये तत्रनस्वस्वत्वनाशः किंतुपरस्वत्वोत्प
त्तिमात्रं स्वस्वत्ववतिस्वत्वासंनिस्तत्रसेच्छायाउत्तेजकत्वादिति स्वस्वत्वध्वंसपूर्वकत्वविशेषणादेवतन्निरासइत्यपरे अदृष्टविशेष
जनकत्वविशेषणात्तद्व्याहतिरित्यप्याहुः एतेनविनिमयविक्रयादिलक्षणातिव्याप्तिरिसपास्ता विक्रयत्वादेर्जातित्वात् मूल्यातिरि
क्तद्रव्यग्रहणप्रयुक्तस्वस्वत्वध्वंसपरस्वत्वानुकूलत्यागोविनिमय इत्यन्ये अथकिमत्रस्वत्वमितिचेत् अत्रप्राञ्चः यथेष्टविनियो
ग्यत्वंस्वत्वं तच्च शास्त्रानिषिद्धविनियोगोपायोयः क्रयप्रतिग्रहादिस्तद्विषयत्वं तच्चनबहिरिंद्रियवेद्यं प्रतिग्रहोदमानसज्ञानविशे
षरूपस्यबहिरिंद्रियायोग्यत्वादित्याहुः नव्यास्तु प्रतिग्रहादिनाशोत्तरमपिस्वत्वव्यवहाराद् दानादितः स्वत्वंनश्यति प्रतिग्रहादि
तश्चस्वत्वमुत्पद्यत इत्यादिप्रसिद्धव्यवहारप्रामाण्यानुरोधात्स्वत्वमतिरिक्तएवपदार्थः तच्चस्वत्वंदानादितोनश्यति प्रतिग्रहादित
श्चजायते तच्च बहिरिंद्रिययोग्यंस्वं पश्यामीत्यादिप्रतीतेः तदीययथेष्टविनियोज्यत्वज्ञानस्य तदीयस्वत्वसाक्षात्कारहेतुत्वात्तन
यथेष्टविनियोगादि अज्ञानदशायांस्वत्वसाक्षात्कारापत्तिः वस्तुतः तदीययथेष्टविनियोज्यत्वे तदीयस्वत्वव्यभिचारित्वग्रहदशायां तद्ग्रहेपि
स्वत्वसाक्षात्कारानुदयात् तदीयस्वत्वसाक्षात्कारंप्रति तदीयस्वत्वव्याप्य तदीययथेष्टविनियोज्यत्वकंदिदमित्याकारकज्ञानस्य तदीयस्वत्व
साक्षात्कारहेतुत्वं वाच्यं तथाच स्वत्वस्यानुमितिरेव नतुसाक्षात्कारः स्वत्वे लौकिकविषयताकत्वेन लौकिकविषयताशालितत्साक्षात्कारेतत्
दशाविशेषदर्शनादेर्हेतुत्वकल्पने चगौरवात् स्वं पश्यामीत्यनुव्यवसायस्तु सुरभिचंदनंपश्यामीत्यादिवत्तन्नविशेषणांशेलौकिकविष
यत्वावगाही नच अयोग्यत्वकल्पनेलौकिकसाक्षात्कारेस्वत्वस्यप्रतिबंधकत्वकल्पनेगौरवमितिवाच्यं तस्यायोग्यत्वेलौकिकविषयताविरहा
देवतत्प्रत्यक्षवारणसंभवात् योग्यत्वेत्वाचरलौकिकप्रत्यक्षसामग्र्यास्तदुत्तरानुमित्यादौ प्रतिबंधकत्वगौरवात् इत्याहुः इत्यलं
मतिविस्तरेण तच्चकर्म त्रिविधं प्राप्यंविकार्यंनिर्वर्त्यंच तत्रसंयोगादिरूपक्रियाजन्यफलशालिप्राप्यं यथाग्रामंगच्छतीत्यादौ
ग्रामादि यत्कृध्वसतानुकमेव अवस्थांतरमापद्यते तद्विकार्यं यथा काष्ठंभस्मकरोति सुवर्णंकुंडलंकरोतीत्यादौ काष्ठादि को
ष्ठादिपदलक्ष्याः काष्ठावयवाः अत्रसतएवभस्मादिसबंधरूपावस्थांतरप्राप्तेः यत्तु क्रियायत्के[illegible]नाशं[illegible]जनयतितद्विकार्यं

यथाकाष्ठं लुनातीत्यत्र काष्ठमिति तन्न काष्ठपदलक्ष्यस्य काष्ठादेरवश्यकर्मतया क्रियायास्तन्नाशकत्वाभावात् अत्र हि का
का ष्ठपदस्य काष्ठावयवे लुनातेः आरंभकसंयोगविरोधिविभागहेतुकुठारादिव्यापारोऽर्थः तथाच काष्ठावयववृत्तितादृशविभा
गावच्छिन्नव्यापारानुकूलकृतिमान् इत्यन्वयधीः इति काष्ठावयवस्यैव प्राप्यकर्मतेव अवक्लृप्तेतरप्राप्त्यभावान्न विकार्यता ओ
५ दनं पचतीत्यादौ ओदनपदलक्ष्य ओदनावयवः पच्यर्थः रूपादिपरावृत्त्यवच्छिन्नतेजःसंयोगः तथाच धात्वर्थजन्यफलशालित्वा
त्ततो ऽवक्लृप्तेतरप्राप्तेश्च उभयविधकर्मत्वं ओदनावयवस्य इष्टं असंकीर्णस्थानमुक्तमेव इत्यदोषः यत्क्रियया निष्पाद्यते
तन्निर्वर्त्यं यथा कटं घटं वा करोतीत्यादौ कटादौ अत्र कृञः फलावच्छिन्नव्यापारबोधकतया गौणकर्मत्वं तत्र साध्य
तारव्यकृतिविषयत्वं अतएव वीरणं करोतीत्यादिर्न प्रयोगः वीरणादावुपादानतारव्यकृतिविषयतायाएवसत्वात् यत्तु
कटादिपदस्य कटाद्यवयवे वीरणादौ निरूढलक्षणा कटादेर्गौणकर्मत्वसंभवेऽपि कारकत्वासंभवात् निरूढलक्षणा
या मुख्यप्रयोगापवादकत्वाच्च न वीरणं करोतीति मुख्यप्रयोग इति तन्न अतीतं घटं जानातीत्यादौ घटादेरिव कटादेरपि
गौणकारकत्वसंभवात् स्तोकं पचतीत्यादौ तु क्रियाविशेषणपदोत्तरद्वितीया विशेषणविभक्तिवत् प्रयोगसाधुत्वाय
नानार्थधात्वर्थयोरभेदान्वय स्वीकारेण अभेदस्य संसर्गत्वात् तदस्वीकारे तु विशेषणविभक्तिवदस्तु सा अभेदा
र्थिका तस्य कारकत्वाभावादित्यादि दिक् करणत्वं च कारकांतरेऽचरितार्थत्वे सति क्रियाहेतुत्वं कारकांतरनिष्ठव्यापारद्वारा क्रि
याहेतुत्वमिति यावत् सत्वंतार्थः कर्तृकर्मणोः कुठारादिकरणनिष्ठव्यापारद्वारा छिदादिहेतुत्वात् आरंभकसंयोगप्रतिद्वंद्विविभा
गानुकूलकुठारादिक्रिया छिदार्थः नातिप्रसंगः अधिकरणमपि कर्तृकर्मान्यतरव्यापारद्वारा क्रियाहेतुः चैत्रो गेहे
स्थाल्यां ओदनं पचतीत्यादौ गेहस्थाल्याद्यधिकरणं कर्मसंयोगद्वारकं पाकक्रियानिमित्तं संप्रदानं स्वानुमति
प्रकाशनेन कर्तुरिच्छाद्वारा दाननिमित्तं अपादानं पतनप्रतिबंधकसंयोगनाशकपत्रादिविभागद्वारा पतनादौ निमि

त्तमिति नातिप्रसंगः नचैवं कुठारादिकरणस्यापि कर्तृकर्मनिष्ठव्यापारसापेक्षत्वादव्याप्तिः कारकांतरनिष्ठव्यापा
रसंबंधाभिन्नजनकत्वाभावे स्वसंबंतार्थत्वं तथा कुठारादिक्रियायां कुठारादेस्तादात्म्येन हेतुतया कर्तृनिष्ठव्यापा
रसंबंधेन हेतुत्वात् नच कर्तृकुठाराभिघातातिव्याप्तिस्तस्यापि लक्ष्यत्वात् अतएव फलायोगव्यवच्छिन्नं कारणं करण
मिति वदंति वस्तुतस्तु व्यापारवत्वे सति कारणत्वं करणत्वं नचैवं कार्यमात्रे ज्ञानादेरदृष्टस्य मनोयोगस्य व्यापार
स्य सत्वादात्मनोऽपि करणत्वापत्तिः इष्टत्वात् उपधेयसंकरेऽपि कर्तृत्वकरणत्वत्वादिरूपोपाधेरसंकराद्व्यवहारोपपत्तेः
दृष्टं च अनुमितौ व्याप्तिज्ञानं करणं परामर्शस्य व्यापारत्वात् चाक्षुषादौ चक्षुरादि तत्संयोगस्य व्यापारत्वात् श्रावणप्रत्यक्षे
स्य श्रोत्रं श्रोत्रमनोयोगस्य व्यापारत्वात् नतु शब्दस्य शब्दाभावप्रत्यक्षे तस्य व्यभिचारात् परंतु फलानुकूलकर्तृव्यापारवत्वं करण
त्वं अस्ति च कुठारादौ छिदानुकूलकर्तृसंयोगादिमत्वं नचैवं गेहस्थाल्याद्यधिकरणस्यापि कर्तृव्यापारवत्वात्करणत्वापत्तिः इष्टत्वात् स्थाल्या
अन्नं साधयतीत्यादिप्रयोगात् एवं गवादानं साधयति ब्राह्मणेन साधयतीत्यादिप्रयोगात् तत्र तद्दिष्टं चैत्र आत्मना चैत्रेण वा पचतीत्याद्य
प्रयोगात् कर्तुः शरीरस्य च वारणाय द्रव्यसमवायिभिन्नक्रियानुकूलकृतिमतो भिन्नत्वेन विशेष्यकृतिमत्वं समवायेन अवच्छेदकतया चेतन
शरीरव्युदासः भिन्नस्य चेतनहस्तादिसंग्रहः हस्तादिनाच्छिनत्तीत्यादिप्रयोगाद्व्यापारवत्वं च जनकतया तद्व्याप्तिस्मृत्यादि साधारण्यमिष्यते अ
त्र परशुनाच्छिनत्तीत्यादौ निरुक्तकरणत्वं तृतीयार्थः आश्रयत्वेन प्रकृत्यर्थान्वितस्य तस्य धात्वर्थे निरूपकत्वेनान्वयः तथाच परशुनिष्ठकरणता
निरूपकच्छिदानुकूलकृतिमानिति वाक्यार्थः इति प्राञ्चः नव्यास्तु परशुनाच्छिनत्ति दात्रेणेत्यादौ नत्र्यर्थान्वयानुरोधान्निरुक्तकरणत्व
निरूपितजन्यत्वमेव तृतीयार्थः तस्य च निरूपितत्वेन प्रकृत्यर्थान्वितस्य आश्रयतया धात्वर्थेऽन्वयः इत्थं च परशुनिरूपितजन्यत्वाभावनिरू
पितजन्यताभावच्छिदायामन्वेतीत्याहुः जटाभिस्तापस इत्यादौ तृतीया उपलक्षणत्वं च अतद्व्यावृत्तत्वे सति अवच्छेदकत्वं तच्च अतद्व्यावृत्तिसमाना
धिकरणत्वं अस्ति च जटायां अतापसव्यावृत्तत्वे सति अवच्छेदकत्वं रामदत्तादिसत्त्वस्यैव तदन्यूनानतिरिक्तवृत्तितया तदवच्छेदकत्वात् रामदत्ता
दिनातापस इतितु अप्रयोगः विवक्षातंत्रत्वादप्रयोगस्येष्टत्वे विशेषणोपलक्षणसाधारणविशेष्यमेव तृतीयार्थ इति अस्त्राकारणः

कार॰ पादेन खंज इत्यादौ येनांगविकारः इति सूत्रेण तृतीया येन अंगिनो विकारो हानिराधिक्यं च तदंगबोधिका तृतीयेति सूत्रार्थः एवं चात्र तृ-
तीयापादनिरूपितमर्थः तच्चायुक्तं नि(?)वेत्रिस्यात् करणादिपदार्थैकदेशे विकारस्त्वेति काणत्वं च बहिरवच्छेदेन चक्षुःशून्यगोलकवत्वं जात
प्रसंगो धृस्य अकाणत्वेन तु चक्षुष्मत्गोलकवत्वं सतीति वाच्यं यदि च बहिरवच्छेदेन चक्षुःसत्वेपि उपघातादेव न चाक्षुषं तदोपहतगोलक-
६ वत्वमेव काणत्वं आक्षिपदं च चक्षुष्मत्गोलकपरं तथा च तादृशगोलकवृत्ति यच्चक्षुःशून्यत्वं उपघातो वा तद्विशिष्टगोलवान् इति लक्षणाया
णइत्यस्यार्थः एवं खंजत्वं संस्थानविशेषशून्यपदवत्वं तथा च पदवृत्ति यत्तथाविधसंस्थानशून्यत्वं तद्विशिष्टवानिति पादेन खंज इत्यस्या-
र्थः मुखवत्रिलोचनत्रयवान् इति मुखेन त्रिलोचन इत्यस्यार्थः परंतु अक्ष्णा काण इत्यादौ अभेदे तृतीया तथा च तादृशगोलकाभिन्न-
यच्चक्षुःशून्यमुपहतं वा तद्वानिति वाक्यार्थः एवं त्रिलोचनपरं लोचनत्रयविशिष्टवत्परं तथा च मुखाभिन्नलोचनत्रयविशिष्टवान् इ-
त्यर्थ इत्याहुः धनेन कुलं इत्यादौ हेतुत्वे तृतीया क्रियान्वयिनिरूढकरणबोधिका तृतीया कर्तृकरणयोस्तृतीयेत्यनेन विहिता हेतौ
इति सूत्रेण तु नामार्थान्विता हेत्वर्थिकेति विशेषः पुत्रेण सहागत इत्यादौ तृतीयायाः कर्तृत्वमर्थः सहशब्दसमभिव्याहृतक्रिया
सहशब्दार्थः एककालीनत्वं संबंधेन तस्याः समभिव्याहृतक्रियायामन्वयः तथा च पुत्रकर्तृकागमनसमानकालीनागमनकर्तेत्यर्थः
शिष्येण सह गुरुर्ब्राह्मणः पुत्रेण सह पिता सुंदर इत्यादौ सहार्थे ब्राह्मण्यादिसमानकालीनत्वसंबंधेन ब्राह्मण्यादिपदार्थैकदेशेन्व-
ति परे त्वत्र सहार्थः साहित्यमेकधर्मवत्त्वं तृतीयार्थो ध्वनित्वं संख्या मात्रं वा तथा च शिष्यसाहित्यवान् गुरुर्ब्राह्मण इत्यादि बोध इत्या-
हुः एकेनापि सुपुत्रेण सिंही स्वपिति निर्भयं सहैव दशभिः पुत्रैर्भारं वहति गर्दभी इत्यादौ पुत्रेषु भारवहनकर्तृत्वाभावेपि सहप्रयोगो विद्य-
मानत्वाहारार्थकस्मानत्वं सहशब्दार्थः अतएव विद्यमानसहार्थे तृतीयेति शाब्दिकाः धान्येन धनी गोत्रेण गार्ग्यः प्रकृत्याभिरूप इत्या-
दौ तृतीया अभेदे धान्याभिन्नधनवान् गोत्राभिन्नगर्गकुलोत्पन्नः साहजिकरमणीयतावान् इत्यर्थः प्रकृतिपदस्य साहजिकार्थत्वात् अभिरू- ६
पपदस्य रमणीयतापदार्थत्वात् इति दिक् कर्मणा यमभिप्रैति स संप्रदानं इति पाणिनीयसूत्रं तत्क्रियाकरणीभूतेन तत्क्रियाकर्मणा यमभिप्रे-
ति फलभागित्वेनोद्दिश्य(?)क्रियते स संप्रदानमिति सूत्रार्थः क्रियाकरणीभूतकर्मजन्यफलभागित्वेनोद्देश्यत्वं संप्रदानत्वं इति फलितं
ग्रामं गच्छतीत्यत्र गमनकर्म ग्रामजन्यसुखादिभागित्वेनोद्देश्यस्य चैत्रादेस्तत्क्रियायां संप्रदानत्वाभावात् द्वारणाय करणीभूत-

ति गमनक्रियायां ग्रामस्य अकरणत्वान्न दोषः दानादौ तु देयादिकरणमिति प्रकृतसंगतिः स्वस्य पित्रादिस्वर्गो-
द्देशेन कृतगोदानादिस्थले दानजन्यफलभागित्वेन स्वस्य पित्रादिरुद्देश्यो न तु गोजन्यफलभागित्वेनेति न तु पित्रादेः सं-
प्रदानत्वं अतएव पित्रे गां ददातीति न प्रयोगः यदि च अदृष्टद्वारा गोर्[?] पितृजन्यत्वं फले दत्तगोः स्वस्य पितृस्वर्गमुत्पादयिष्य-
तीति चाभिसंधिः तदा फले कर्मजन्यत्वं अदृष्टद्वारकं ग्राह्यं अतएव न स्वस्मिन् स्वकर्तृकदानसंप्रदानत्वं नवा चैत्र आत्म-
ने गां ददातीति प्रयोगः वस्तुतो धात्वर्थतावच्छेदकत्वेन फलविशेष्यं स्वस्य पितृस्वर्गादिकं तु न तथेति न दोषः इत्यत एव विप्राय गां ददाती-
त्यादौ संप्रदानत्वपरे विषयत्वं चतुर्थ्यर्थः चैत्राय गच्छतीत्यादिवारणाय परेति स च धात्वर्थतावच्छेदकफले अन्वेति इति
द्वितीयार्थः तथा च विप्रसंबंधित्वपरेच्छाविषयगोवृत्तिस्वस्वत्वध्वंसपरस्वत्वानुकूलत्यागानुकूलकृतिमान् इत्यन्वयधीः यत्तु अ-
न्ये जन्यफलप्रकारकत्वं क्रियान्वयि चतुर्थ्यर्थः ब्रुवन्ति वित्र्याः(?) तदेकदेशे जन्यत्वे कर्मणो गवादेर्निरूपकतासंबंधेनान्वयः तथा च
विप्रविषयकगोजन्यफलप्रकारकेच्छापूर्वकगोवृत्तिस्वस्वत्वध्वंसपरस्वत्वानुकूलत्यागानुकूलकृतिमान् इत्यन्वयधीरिति
न गोजन्यफलस्य प्रकृते स्वत्वरूपतया विप्रविषयिकाया गोजन्यफलप्रकारकेच्छायाः तत्पूर्वकत्वस्य दाने असंभवात् तादृशे-
च्छाया एव दानत्वादिति दिक् एवं वृक्षाय उदकमासिंचतीत्यादौ संयोगानुकूलद्रवद्रव्यक्रियानुकूलव्यापारो धात्वर्थः इतीते-
न इच्छाविषयत्वं चतुर्थ्यर्थः स च धात्वर्थतावच्छेदकसंयोगान्वयी द्वितीयार्थो वृत्तित्वं तादृशद्रवद्रव्यक्रियान्वयि तथा-
च वृक्षवृत्तित्वेन इच्छाविषयसंयोगानुकूलउदकवृत्तिद्रवद्रव्यक्रियानुकूलव्यापारानुकूलकृतिमान् इत्यन्वयधीः अत्र क्रिया-
तस्य धात्वर्थतावच्छेदकस्य कर्मत्वस्यानत्वं तु तत्तस्य क्रियायाः परसमवेतत्वात् न चैवं पयसा … मासिंचतीति न स्यात् धा-
त्वर्थतावच्छेदकक्रियायाः परत्वादिति वाच्यं अत्र क्रियायास्तस्य धात्वर्थतया धात्वर्थतावच्छेदकसंयोगस्य हृदवृत्तित्वात् द्रवद्रव्य-
संयोग एव अत्र धात्वर्थ इति तु न युक्तं तर्हि फलावच्छिन्नव्यापारबोधकतया धातोरकर्मकत्वं धात्वर्थतावच्छेदकफलशालित्वाभावात् वृक्षादे

कर्मकत्वं धात्वर्थतावच्छेदकफलशालितयाभावाद्वृक्षादेरकर्मकत्वं च स्यात् अत्र अजां ग्रामं नयतीतिवत् द्विकर्मकत्वं स्यात् इति नाशंक्यं क्रियो
का॰ तार्थत्वेपि फलद्वयाभावात् क्रियानुकूलव्यापारार्थत्वे क्रियायामेव द्वितीयार्थकत्वेनान्वयात् क्रियावच्छेदकसंयोगे तु वृक्षायेत्यादिना चतुर्थ्यर्थस्य
उद्देश्यत्वस्यैवान्वयो न द्वितीयार्थस्य व्यासंनिवेशे चतुर्थीसमभिव्याहारस्थले वसिद्ध धातोस्तादृशव्यापारार्थत्वात् एतेन अजां ग्रामं नयतीत्यत्र ग्रा
७ मस्य न संप्रदानत्वं अवधिसंयोगावच्छिन्नक्रियानुकूलव्यापारः प्रेरणादिर्धात्वर्थः द्वितीयाद्यर्थश्चेति संयोगे ग्रामपदोत्तरद्वितीयार्थः क्रि
याऽजापदोत्तरद्वितीयार्थो नेति तथैवान्वयुक्तेः तादृशफलभागित्वेन ग्रामादेरनुद्देश्यत्वान्न संप्रदानता तयोरुद्देश्यविवक्षायां तु ग्रामाय अ
जां नयतीति भवत्येवेति दिक् परे तु सद्यमानद्रव्यस्वत्वभागित्वेनोद्देश्यत्वं संप्रदानत्वं संगान्वविलक्षणं ग्राह्यं तेन विप्राय गां ददातीत्यादौ विप्रादेः सं
प्रदानत्वं कर्मणा यमभिप्रैति स संप्रदानमिति कर्मणेत्यादिसूत्रार्थः अत एव संप्रदीयते अस्मै इति संप्रदानसंज्ञा अन्वर्था ब्रा
ह्मणादेरपि श्राद्धेऽन्नस्वत्वभागित्वेनोद्देश्यत्वं किंतु प्रीतिभागितयेति संप्रदानत्वाभावेन तत्र दानेन चतुर्थ्यर्थसंभवात् नमः स्वस्तीत्यादिना सूत्रांतरेण
तत्र चतुर्थी एवं रजकाय वस्त्रं ददातीत्यादौ रजकादेः संप्रदानत्वाभावेन चतुर्थी प्रामाणिकीत्यर्थः अत एव ब्राह्मणाय वस्त्रं मुंचति मित्राय दूतं प्रेषयती
त्यादौ धात्वर्थतावच्छेदकफलेऽद्रव्यत्वाभावेपि चतुर्थी विभागानुकूलव्यापारो मोचनं संयोगानुकूलक्रियानुकूलव्यापारः प्रेषणमिति
धात्वर्थतावच्छेदकक्रियारूपफलशालित्वेन अनुद्देश्यत्वं दूसं च उदकादिजन्यपल्लवादि शस्त्रजन्यदुःखाद्युद्देश्यजन्यवार्त्ताज्ञा
नादिफलशालित्वेनोद्देश्यत्वमेव वृक्षायेत्यादिचतुर्थ्यर्थः तथाच वृक्षादिपल्लवोद्देश्यकजलदानक्रियानुकूलव्यापारानुकूल
कृतिमान् शत्रूद्देश्यकास्त्रविभागावच्छिन्नक्रियानुकूलव्यापारानुकूलकृतिमान् मित्रवार्त्ताज्ञानोद्देश्यकदूतगमनावच्छिन्न
क्रियानुकूलव्यापारानुकूलकृतिमानिति बोधः ननु गुरुप्रीत्युद्देशेन गुरुपुत्राय ददाति गुरवे गां ददातीति स्यात् तथाविवक्षा
विरहात् अत एव रजकस्वत्वभागित्वस्य तात्पर्यविषयत्वे रजकस्य वस्त्रं ददातीति प्रयोगः वस्त्रप्रतीप्रजन्यफलभागित्वस्य
तात्पर्ये तु रजकाय वस्त्रं ददातीत्येव भवति न चैवं श्राद्धादावपि पित्रादेः प्रीतिभागितया उद्देश्यत्वात् संप्रदानचतुर्थ्यापत्ति
पत्तेः नमः स्वस्तीत्यादिसूत्रांतरवैयर्थ्यं यत्किंचित्क्रियाकर्मजन्यफलभागित्वेनोद्देश्यत्वस्यैव गौणसंप्रदानत्वरूपतया नमः
पदार्थादेः क्रियात्वाभावेन पृथक् सूत्रप्रणयनात् नारदाय रोचते कलहः वैश्याय शतं धारयतीत्यादौ न नारदादेः संप्र

दानता किंतु रुच्यर्थानां प्रीयमाणः धारेरुत्तमर्णः इति सूत्राभ्यां संबंधमात्रे चतुर्थी तथाच चतुर्थ्या संबंधो धातुना रुच्यर्थे वि:
आख्यातेन विषयता बोध्यते इति नारदस्य रुचिविषयः कलह इत्यर्थः पुनर्दानमंगीकृत्य द्रव्यग्रहणं वैश्यस्य शतकर्मकता
इत्यग्रहणाश्रय इत्यर्थः संप्रदानस्य कारकत्वं धात्वर्थतावच्छेदकस्वत्वनिष्पादकत्वेन ददत्स्वस्वानुमतिप्रकाशनेन वा कुपिका
नुसाध्यदानसंपादनेन वा बोध्यः सागजन्यस्वत्वजनकस्वीकारवत्त्वं संप्रदानत्वं श्राद्धेपि पित्रादेर्न स्वीकारः रुच्यर्थादेरु
तीयत्वेनापि गौणसंप्रदानत्वं उद्देश्यत्वरूपमिति संपादुः परकीयक्रियाजन्यविभागाश्रयत्वमपादानत्वं वृक्षात्पर्णं पतती
त्यादौ पत्रादेरपादानत्ववारणाय परकीयेति अत्र पंचम्या विभागजनकत्वं अन्योन्याभावप्रतियोगितावच्छेदकत्वं चार्थः वि
भागोऽन्योन्याभावश्च वृक्षो ... नेति तथा वृक्षवृत्तिविभागजनकवृत्त्यन्योन्याभावप्रतियोगितावच्छेदकपतनाश्रयपत्रं
इति वाक्यार्थः तथा ध्रुवमपायेऽपादानमिति पाणिनिसूत्रं अपाये विभागे ध्रुवं निश्चलं प्रकृते पंचम्यर्थविभागजन
कत्वान्वयि क्रियातद्भिन्नमिति तदर्थः धावतोऽश्वात्पततीत्यादौ अश्वादेस्तादृशविभागहेतुक्रियावत्त्वेपि प्रकृतपंचम्यर्थवि
भागजनकत्वान्वयिनी या पतनक्रिया तद्भिन्नत्वं अव्याहतं स्पंदजनकविभागाश्रयत्वेन वृक्षादेरपादानत्वे वृक्षात्
पर्णं स्पंदते इत्यपि स्यात् अतः क्रियेति सकर्मकधात्वर्थपरं व्याघ्राद्बिभेतीत्यादौ पंचम्या नापादानत्वं किंतु हेतुत्वे इत्य
ग्रे वक्ष्यते धात्वर्थतावच्छेदकत्वविभागविशेष्यः तेन वृक्षत्वजातिरवगत इत्यादौ वृक्षादेर्नापादानत्वं यत्तु विभागावच्छिन्न
क्रियायाः पंचम्यर्थतया विभागविशिष्टक्रियाजन्यत्वाभावान्नात्र दोष इति तन्न तद्वदेव संयोगावच्छिन्नक्रियायाः
पतत्यर्थतया असंभवापत्तेः विभागफलोपलक्षितव्यापारजन्यत्वं तु उभयत्र तुल्यमिति दिक् वृक्षाद्विभजते इत्या
दौ विभागावच्छिन्नमपादानत्वं अवधित्वस्वरूपसंबंधरूपं पंचम्यर्थः अपायविभागे ध्रुवं अवधिभूतं अपादानमिति पा
णिनिसूत्रार्थः तथाच वृक्षादिनिष्ठावधितानिरूपकविभागाश्रयः पर्णं इत्युभयवाक्यार्थः नचैवं स्वस्मात् विभजते इत्यपि स्या
त् स्वप्रतियोगिकत्वविशिष्टसंयोगस्य स्वावच्छिन्नकत्वविशिष्टविभागस्यापि स्वस्मिन्नभावात् इत्थं च अपादानपदं पंच

जयरा. भीत्रनानार्थकमेवबोध्यं धावतोश्वात्पततीत्यादावपि अवधित्वमेव पंचम्यर्थ इति कश्चित् व्याघ्राद्बिभेति शत्रोः प्रति
का. ...तीत्यादौ पंचमी नापादाने किंतु भीत्रार्थानां भयहेतुरिति सूत्रेण अनुशिष्टहेत्वर्थिका धावतश्चात्र यथायथं भयभया
वत्वश्चार्थः पंचम्यर्थहेतुत्वं धात्वर्थे भये धात्वर्थतावच्छेदकं च भयत्वमेवेति आश्रयत्वं व्यापारश्च यथायथं आख्यातार्थः तथा
८ च व्याघ्रहेतुकभयाश्रय इत्यादौ शत्रुहेतुकभयाभावानुकूलव्यापारवानित्यर्थः इत्थं हेतुपंचम्यैवोपपत्तौ पृथक्सूत्रं प्रपं
चार्थमिति बोध्यं एवं कूपादंधं वारयति इत्यादौ पंचम्या अधःसंयोगानुकूलक्रियारूपं पतनं द्वितीयाया धात्वर्थव्यापारान्वित
त्वं तिङ् धातोः विरोधिव्यापारोर्थः तथाच अंधः इति कूपनिष्ठाधःसंयोगानुकूलक्रियाविरोधिव्यापारविषयककृतिमानित्यर्थः इति वा
च्यार्थो नयुक्तः यत्र द्वित्रिक्षणस्थायिनि खंडकूपपरमाण्वादेः अधःसंयोगो मानाभावेनासिद्धत्वात्तत्रासंभवात् अतएव द्वि
तीयायाः पतनं पंचम्या धात्वर्थतावच्छेदकाभावान्वयि इतितिः धातोरभावानुकूलव्यापारोर्थः तथाच कूपकर्तृकपतनाभावा
नुकूलव्यापारविषयकयत्नवानित्यर्थोप्यपास्तः यदंधस्यपतनं अप्रसिद्धं तत्रासंभवात् किंतु धातोः अभावानुकूलव्या
पारः पंचम्या इति द्वितीयाया प्रतियोगित्वं अनुयोगित्वं वा धात्वर्थतावच्छेदकीभूताभावान्वितं अर्थः अभावश्च कूपा
दिसमभिव्याहारात् पतनादिना तद्रूपः अधःसंयोगादिना वा संबंधेन तथाच कूपवृत्ति अधःजातियोगिताभावानुकूलव्यापारविष
यकयत्नवानिति वाक्यार्थः एवमेतस्मात्सविषान्नात् इमं मित्रं वारयतीत्यादौ यत्र विषान्नस्य मित्रस्य भोजनं अप्रसिद्धं तत्रापि
भोजनादिसंबंधेन सविषान्नप्रतियोगिकाभावानुकूलव्यापारविषयकयत्नवान् इत्यन्वयधीः परंतु कूपादंधं
वारयतीत्यत्र सविषादन्नात् अमुमित्रं इत्यत्र च धातोः पातन आद्ये द्वितीये भोजनं उभयत्र अभावानुकूलव्यापारश्चार्थः
पंचम्याः आद्ये अवच्छिन्नत्वं द्वितीये कर्मत्वं उभयत्रापि द्वित्वं चार्थः द्वितीयायाश्च कर्तृत्वं अर्थः धात्वर्थतावच्छेदकीभूताभावेधा
त्वर्थपातनादेः अधिकरणत्वेन द्वितीयावच्छिन्नस्य पंचम्यर्थद्वितीयार्थयोः प्रतियोगित्वेनान्वयो व्युत्पत्तिवैचित्र्यात् तथाच
पतनसामान्ये यः कूपावच्छिन्नबाधकर्तृकत्वाभाववत्त्वं तदनुकूलव्यापारविषयकयत्नवान् इत्यादि स्यभोजनसामान्ये यः स

विषान्नकर्मत्वमित्रकर्तृकत्वोभयाभाववत्त्वं तदनुकूलव्यापारविषयकयत्नवान् इति द्वितीयस्यार्थः आकाशं न पश्यति घटं चैत्रो वा
इत्यादौ द्वितीयायाः विषयित्वं लक्षणया घटादिदृष्टित्वं च वा धातुना लौकिकविषयत्वादीति चेन्न ... तथा
लौकिकचाक्षुषप्रत्यक्षसामान्ये यत्र आकाशविषयत्वघटादिदृष्टित्वोभयाभावस्तत्प्रतियोगिनिरूपको घट इत्यर्थः आकाशा
दिविषयकचाक्षुषोपनीतभानेपि लौकिकविषयत्वावच्छेदेन आकाशविषयत्वं चैत्रवृत्तित्वोभयाभावसत्त्वान्न दोषः एवमन्यत्रा
पि अप्रसिद्धस्थले बोध्यमित्याहुः हिमवतो गंगा प्रभवतीत्यादौ पंचम्या हेतुत्वं धातोः उत्पत्तिरर्थः इत्ययुक्तं तर्हि जनिकर्तुरित्येवो
पपत्तौ भुवः प्रभव इति व्यर्थत्वप्रसंगात् किंतु प्रकर्षेण भवनं प्रकाशः आद्यं बहिः संयोगरूपो धात्वर्थः बहिः पदार्थः प्रकृते भूखंड
पंचम्यर्थः संयोगध्वंसाव्यवहितोत्तरक्षणवृत्तित्वं आख्यातार्थः आश्रयत्वं तथाच हिमालयसंयोगध्वंसाव्यवहितोत्तरत्वाध
पृथिवीसंयोगाश्रयत्ववती गंगेत्यर्थः वैकुंठात् काशीतो वा गंगा प्रभवतीत्यप्रयोगात् अव्यवहितेति अयोध्यातश्च वैकुंठसंयोगध्वंसाव्यवहि
तोत्तरक्षणे भूखंडस्य काशीसंयोगध्वंसाव्यवहितोत्तरक्षणे आद्यस्य तस्याभावाद्दोषः वल्मीकाग्रात्प्रभवति धनुः खंडमाखंडलस्ये
त्यादावपि एवमेवात्र बहिः पदार्थो वल्मीकाग्रावधिदेशवृत्तिविशेषः कृष्णात्पराजयते शिशुपालः अध्ययनात्पराजयते बाल इत्यादौ धातोः
असहिष्णुता पंचम्याः कर्मत्वं आख्यातस्य आश्रयत्वमर्थः कृष्णं न सहते अध्ययनं न सहते इति विवरणात् असहिष्णुतावच्छेदकं विषय
त्वं वा शंकनीयत्वं च तथाच कृष्णविषयकाभिन्नवान् शक्यत्वज्ञानवानित्यादौ अध्ययनविषयकाभिन्नत्वे शक्यत्वज्ञानं
नित्यस्यार्थः विप्राद्धनमादत्ते इत्यादौ पंचम्याः यथेष्टविनियोगोर्थः ननु स्वत्वं चोराद्धनमादत्ते इत्यादौ चौरस्य स्वत्वाभावेन तदसंभवात्
धातोरपि यथेष्टविनियोगफलस्वीकारोर्थः ननु स्वत्वजनकस्वीकारः विप्राद्धनमादत्ते चौर इत्यादौ चौरस्य तदसंभवात् पंचम्यर्थश्च
नियोगः अव्यवहितोत्तरत्वसंबंधेन धात्वर्थतावच्छेदके विनियोगेन्वेति अव्यवहितोत्तरत्वं च स्वसमानविषयपुरुषांतरीयविनियोग
व्यवहितभिन्नत्वं तेन भृद्भूत प्रतिग्रहीत्रा विप्रेण दत्तं धनमदातरि शूद्राद्दत्ते इति न प्रयोगः इत्थं च विप्रीय विनियोगाव्यवहितोत्तर
धनवृत्ति यथेष्टविनियोगफलस्वीकारवान् इत्यर्थः अधर्माज्जुगुप्सते इत्यत्र पंचम्याः कर्मत्वं धातोः निंदार्थः तथाच अधर्मं निंदती

का॰ त्यर्थः अधर्माद्विरमतीत्यादौ धातोः कारणाभावं अकारणं पंचम्याः कर्मत्वमर्थः तत्त्वकरणे अकरणे चान्वेति तथाच अधर्मं
पुनः करोतीत्यर्थः धर्मात्प्रमाद्यतीत्यादौ पंचम्याः विषयत्वं धातोः अनवधानं आख्यातस्य आश्रयत्वं अर्थः धर्मवि
९ षयकावधानाभावाश्रय इति वाक्यार्थः उपाध्यायादंतर्द्धत्ते शिष्य इत्यादौ धातोः स्वविषयप्रत्यक्षविरोधिव्यापारः
पंचम्याः संबंधित्वं धात्वर्थतावच्छेदकप्रत्यक्षान्वितं आख्यातस्य कृतिरर्थः उपाध्यायसंबंधिस्वविषयकप्रत्यक्षविरो
धिव्यापारानुकूलकृतिमान् इति वाक्यार्थः दंडाद्घटः धूमाद्वह्निमान् इत्यादौ च पंचमी नापादाने क्रियायोगाभावा
त् किंतु जनकत्वज्ञापकत्वरूपहेतुत्वे अन्यत्व ज्ञाप्यत्वरूपहेतुमेव वा हेतौ इति सूत्रेणानुशिष्टा नचैवं जनिकर्तुः प्रकृतिरिति
सूत्रं व्यर्थं कार्यात्स्वतीतिनच दंडाज्जायते इत्यादावपि उत्पत्तिनिरूपितहेतुत्वार्थे पंचम्या हेतावितिसूत्रेणैव संभवात् इति वाच्यं
उत्पत्तेः अहेतुकत्वेपि सावधिकव्यवहाराद् उत्पत्तिरूपधात्वर्थनिरूपितस्वरूपसंबंधस्य हेतुत्वानात्मकतया हेताविति सूत्रेणैव सं
भवात् इति वाच्यं उत्पत्तेरहेतुकत्वेपि सावधिकत्वव्यवहाराद् उत्पत्तिरूपधात्वर्थनिरूपितस्वरूपसंबंधस्य हेतुत्वानात्मकतया हे
ताविति सूत्रेण तदर्थकपंचम्या असंभवादिति अधिकरणत्वं च तत्तत्संबंधः संयोगादिरूपसंबंधस्य द्विष्ठतया बदरादेरपि कुंडा
द्याधारतापत्तेः नचस्वधर्मसंबंधः अधिकरणत्वं कुंडादिकं च न बदरादिधर्मः इति वाच्यं स्वधर्मस्य स्वाधेयत्वरूपतया स्वा
धेयस्य च स्वनिष्ठाधिकरणतानिरूपणकत्वेनान्योन्याश्रयप्रसंगात् नाप्यपूर्वं तत्तत्स्थितत्व इत्यपेक्षणीयमधिकरणं
उत्सत्वेपेक्षणीयं कार्यस्य समवायिकारणस्थितत्वे घटादेर्भूतलत्वे आत्मादेः समवायिसमवायादेः स्वरूपसंबंधी ९
ति वाच्यं अपेक्षणीयत्वस्य कारणत्वरूपत्वे असमवायिकारणादौ अतिव्याप्तेः समवायिकारणत्वं तु घटत्वादिजातेर्घटादेन
संभवति नापि तद्भिन्नत्वे सति तत्पतनप्रतिबंधकत्वं संयोगवन्मूर्तत्वे पतनमूर्तस्याधिकरणत्वं ब्रह्मादिधारकसंयोगाश्रयस्य ख
रणाय मर्जितकुपाते मत्स्यन्मानस्य विलक्षणत्वसंयोगादेस्तत्संबंधित्वं एवं रक्तः पट इत्यादौ परंपरासंबंधेनापि वक्तव्यमिति वाच्यं

अननुगमात् सप्तम्या नानार्थत्वस्य अन्याय्यत्वात् किंतु प्रतियोगित्वादिवत् अधिकरणाकारणप्रतीतिसाक्षिकं अधिकरणत्वं स्वरूपसं
बंधरूपं अतिरिक्तं वा इत्यन्यदेतत् एवं आधेयमपि इत्थं च गृहे स्थाल्यामोदनं पचतीत्यादौ पच्यर्थः अधःसंतापनं अधोवह्निसंयोगानु
कूलकाष्ठवह्न्यादिव्यापार इत्येके पच्यर्थाग्नितंडुलादिसंयोगएव पाकजरूपं इत्यादिव्यवहारादित्यन्ये उभयथापि गेहादेः साक्षात्तदधि
करणत्वाभावात् कर्तृकर्मान्यतरद्वारा क्रियाश्रयत्वरूपक्रियाधिकरणत्वं सप्तम्यर्थः यदाहुः कर्तृकर्मव्यवहितसाक्षाद्धारयत्क्रि
यां उपकुर्वत् उभयथा सिद्धे शास्त्रेऽधिकरणं स्मृतमिति वस्तुतः परंपरया क्रियाश्रयत्वमात्रं सप्तम्यर्थः अतएव ग्रामगमने दीर्घदंडादिना
बालेन द्वारा गेहमधिपाककरणेऽग्न्यकर्तद्वारा क्रियानाश्रयत्वेपि गेहे पचतीति प्रयोगः स्यात् वह्निचैत्रादेः साक्षात्साक्षाद्गमनक्रियाश्र
यत्वेपि वह्नौ पचति चैत्रे गच्छतीत्याद्यप्रयोगात् परंपरयेत्युक्तं नचैवं क्रियाश्रयत्वस्यैव सप्तम्यर्थत्वे क्रियासंयोगं विना भूतले घट इत्यादिप्र
योगानस्यादितिवाच्यं इष्टत्वात् नहि क्रियारहितं वाक्यमस्तीति शाब्दिकाः वस्तुतः अधिकरणत्वमात्रं आधेयत्वमात्रं वा सप्तम्यर्थः
निरुक्तशब्दस्यान्यलभ्यत्वात् सर्वत्र क्रियायामन्वेति तत्र कारकव्यवहारः अतएव भूतले घट इति क्रियाशून्यवाक्यात् शाब्दबोध इ
ति नैयायिकाः अत्र भूतलनिष्ठाधिकरणतानिरूपक घट इत्याकारको बोधः निष्ठत्वं निरूपकत्वं च संसर्ग इति प्राञ्चः एवं सति निरूप
कत्वसंबंधस्य प्रतियोगितानवच्छेदकत्वात् भूतले न घट इत्यादौ नञर्थान्वयासंभवात् भूतलनिरूपिताधेयत्वाश्रयो घट इत्यन्वयबोधः
निरूपितत्वं आश्रयत्वं च संसर्ग इति तु नव्याः निमित्तसप्तम्यर्थः निमित्तत्वं तच्च उद्देश्यत्वे फलत्वं तेन वा इच्छारूपत्वं तत्राद्ये मशकनिवृत्तौ धूमं
करोतीत्यादौ मशकनिवृत्त्यादेः फलत्वात् द्वितीये चर्मणि द्वीपिनं हंतीत्यादौ चर्मादेः सिद्धत्वात्स्वरूपफलत्वं तेनैव इच्छाविषयत्वात्
तच्च प्रयोज्यत्वेन धात्वर्थेन्वेति तथाच मशकनिवृत्त्युद्देश्यकधूमकरणाश्रयः चर्मविषयकस्वस्वप्रकारकेच्छाप्रयोज्यद्वीपिवृत्तिक
हननानुकूलकृतिमान् इति च क्रमेण बोधः एवं सीम्नि पुष्कलको हत इत्यादावपि पुष्कलको गंधमृगः सीमा नस्यांडकोश इति कोशात्
सा च निमित्तात् कर्मयोग इति अनुशासनात् यत्किंचित्कर्मप्रकारकबोधजनकधातुप्रयोगे प्रयुज्यते तादृशबोधजनकता च
सकर्मकस्य धातोः कर्मबोधपदयोगेन यथा द्वीपिनं हंतीत्यादौ कर्मकत्वात् कर्मविशिष्टस्वार्थशक्तत्वात् यथा अविद्यारजनीक्षयमुद्दे
तीत्यस्य उदयगिरिशिखरमारोहतीत्यर्थात् अत्र रजनीक्षयस्य तृतीयाद्यजन्यत्वेपि निमित्तत्वात् ज्ञानविषयत्वेन उद्देश्यत्वात्ते
नलोकानां रजनीक्षयज्ञानार्थं यदुदेतीत्यर्थ इत्येके एतद्दूषयंति यावद्विरोधिसंसर्गाभावविशिष्टकालत्व रजनीत्वात्.

कार. सूर्योदये तद्रश्म्युत्पादन तद्भागभावुनाशे विशिष्टकालनाशात् रजनीक्षयेऽकाप्रबोध्यं सूर्योदये अस्ततमिस्तन्ये शरदिपुष्प
तिक्त सप्तच्छदा इत्यादौ उत्पत्तिरपि सप्तम्यर्थः शरदुत्पत्तिपुष्पाश्रयः सप्तच्छदा इति वाक्यार्थः न च शरदुत्पत्तिकपुष्पाश्रयत्वं च
१० पाकादावपि तत्प्रयोगः स्यादिति वाच्यं सप्तच्छदस्य पुष्पाश्रयत्वे तद्वत्पुष्पविनिवेशतया पुष्पेष्वपि सप्तच्छदवृत्तित्वलाभात्
तदवच्छेदेन शरदुत्पत्तिकत्वस्य कुसुमनिसिद्धत्वात् पाकादिपुष्पत्वावच्छेदेन च शरदुत्पत्तिकत्वाभावेन तथाप्रयोगाभावात् धातोरेव
सप्तच्छदे पुष्पत्वेन लक्षणेति दिक् सति सप्तम्याः सामानाधिकरण्यमित्यर्थः गुणकर्मान्यत्वे सति सत्त्वादित्यादौ गुणकर्मान्यत्वसमा
नाधिकरणसत्त्वबोधात् तत्र क्वचित्कालिकं क्वचिद्दैशिकं तत्राद्यं समानकालीनत्वपर्यवसन्नं यथा गोषु दुह्यमानास्वागतो दुग्धास्वा
गत इत्यादौ अत्र सप्तम्यर्थे समानकालीनत्वेन दोहने मात्रस्य निरूपकत्वेनान्वयः महिष्यादिदोहनकालीनत्वे तथाप्रयोगाभावात् नापि
गोदोहनस्य गोदोहनत्वेन धातोरनुपस्थितिः किंतु विशेषणकर्म विशेषणदोहनस्य इत्थं च तादृशदोहनसमानकालीनातीताग
मनानुकूलकृतिमान् इत्याद्यस्यार्थः दुग्धास्वागत इत्यादौ तु ततोऽन्वयः आगमनकाले दोहनस्य अतीततया दोहनकालीनत्व
स्यागमने बोधात् किंतु वर्तमानध्वंसप्रतियोगिदोहनकर्मसु गोष्विति दुग्धासु गोषु इत्यर्थे तादृशदोहनत्वविशेषणप्रति
योगित्वविशेषणध्वंसस्य समानकालीनत्वमागमने भासते तथा च इदृशवर्तमानध्वंसकालीनागमनानुकूलकृतिमानिति द्वि
तीयवाक्यार्थः एवं गोषु दुह्यमानास्वागत इत्यादावपि तादृशप्रतियोगित्वविशेषणप्रागभावस्य समानकालीनत्वं भासते तत्र सप्त
म्यर्थसमानकालीनत्वप्रकृत्यर्थस्य गोरन्वयापत्तिः तादृशदोहनकर्मत्वविशिष्टगोः स्वविशेषणकर्मविशेषणदोहनादिप्रत्ययस्य संबन्धेन
कालेऽन्वयात् इदं तु बोध्यं यस्य च भावेन भावलक्षणमिति सूत्रस्य क्रियायाः क्रियान्तरं लक्ष्यत इति व्याख्यानात् क्रिययोः सामानाधिकरण्य १०
सप्तमी तत्सूत्रेणानुशिष्टेति गुणकर्मान्यत्वे सति सत्त्वादित्यादौ नामार्थयोः सामानाधिकरण्ये यद्यपि सप्तमी न युक्ता तथापि गुणकर्मा
न्यत्वे सति सत्त्वादिस्थले युक्तप्रयोगदर्शनात् सूत्रतद्व्याख्यानयोः भावक्रियापदं धर्ममात्रपरं तथा च यस्य धर्मेण धर्मान्तरं निरूप्यते
सामानाधिकरण्यं ज्ञापयते तत्र सप्तमीति सूत्रार्थ इत्यदोष इति समासः॥ इति श्रीमहामहोपाध्यायश्रीयुतजयरामन्यायपं
चाननविरचितः कारकवादः संपूर्णः श्रीरस्तु शके १७ ... माघासितपंचम्यां वटपत्तने गुर्जरे जडियोपाध्येन घनश्यामेनालेखि·